दिनाङ्कः :- 22.10.2024

सायं - 06:20

<u>मुख्यवार्ताः</u>

- प्रधानमन्त्री नरेन्द्र मोदी अद्य षोडशतमे ब्रिक्सेति शिखर-सम्मेलने इतर-कजान इति क्षेत्रे रूसदेशस्य राष्ट्रपतिना ब्लादिमीर-पुतिन इत्यनेन सह द्विपक्षीयोपवेशनं कृतवान्। रूस-यूक्रेन-विवादे श्रीमोदिना भणितं यत् अनयोर्मध्ये चलायमानः विवादः शान्तिपूर्ण-रीत्या शमितः स्यादिति।
- राष्ट्रपतिः द्रौपदीमुर्मुः अद्य नवदिल्ल्यां त्रयोविंशत्यधिक-द्विसहस्रतमवर्षस्य पञ्चमं राष्ट्रिय-जल-पुरस्कारं दत्तवती।
- नवदिल्लिना युद्धग्रस्ताय फिलिस्तिनदेशाय त्रिंशत्-टन-परिमितस्य मानवीय-सहायता-सामग्री इत्यस्य प्रथम-पुटकं सम्प्रेषितम्।
- भारतीय-रिजर्व-बैंक इत्यस्य प्रशासकेन शक्तिकान्त-दासेन उक्तं यत् भारतस्य विकासकथा नैरन्तर्येण वरीवर्धमानाऽस्ति, यतो हि अस्याः मूलचालकौ उपभोक्ता निवेशापेक्षा च गतिमन्तौ स्तः।
- बङ्गोपसागरीय-क्षेत्रे समागतः सागरीय-झञ्झावातः दाना इत्याख्यः उग्रतां भजते।

<u>प्रधानमन्त्री/रूस</u>

प्रधानमन्त्री नरेन्द्र मोदी अद्य षोडशतमे ब्रिक्सेति शिखर-सम्मेलने इतर-कजान इति क्षेत्रे रूसदेशस्य राष्ट्रपतिना ब्लादिमीर पुतिन इत्यनेन सह द्विपक्षीयोपवेशनं कृतवान्। उपवेशनेऽस्मिन् मोदिना प्रोक्तं यत् गतेषु त्रिषु मासेषु रूसदेशं प्रति कृता तस्य यात्रा उभयोर्देशयोः मध्ये घनिष्ठ-सम्बन्धेन सह गह्वरीं मित्रतामपि दर्शयति। तेनोक्तं यत् कजानक्षेत्रे नूतनस्य वाणिज्य-दूतावासस्य उद्घाटनेन उभयोः देशयोर्मध्ये सम्बन्धाः इतोऽपि सुदृढाः भविष्यन्ति।

1705 पीएम रूसराष्ट्रपति-1

रूस-यूक्रेन-विवादे श्रीमोदिना भणितं यत् रूसयूक्रेनयोर्मध्ये चलायमाने-विवादे भारतदेशः निरन्तरतया संपर्के आस्तीति। तने भारतस्य दृष्टिकोणं पुनाम्रेडितं यत्

रूस-यूक्रेनयोर्विवाद: शान्तिपूर्ण-रीत्या शमित: स्यादिति। शिखर सम्मेलनस्य अस्य मुख्य-विषय: अस्ति-न्यायपूर्ण-वैश्विक-विकासेन सह सुरक्षायै बहुपक्षवादस्य सशक्तिकरण-मिति। प्रधानमन्त्रिणा अस्या: यात्राया: शुभारम्भात् प्राक् प्रोक्तं मासीत् यत् भारतदेश: ब्रिक्स-देशेषु आभ्यान्तरिकी घनिष्ठता, सहयोगश्च सुदृढा भवेदिति विचारयति। तेनोक्तं यत् ब्रिक्स-समूह: विकास-लक्ष्यम्, बहुपक्षवाद:, जलवायुपरिवर्तनम्, आर्थिकसहयोग:, लोचपूर्णाया: आपूर्तिशृंखलाया: विनिर्माणादिना सह सांस्कृतिक-बिन्दुभि: समं जनेषु पारस्परिक-सम्पर्कान् च अभिवर्धनाय महत्वपूर्णमञ्चत्वेन प्रथितोऽस्ति।

<u>राष्ट्रपति/ जलपुरस्कार</u>

राष्ट्रपतिः द्रौपदीमुर्मुः अद्य नवदिल्ल्यां त्रयोविंशत्यधिक-द्विसहस्रतमवर्षस्य पञ्चमं राष्ट्रिय-जल-पुरस्कारं दत्तवती। केन्द्रीयजलशक्तिमन्त्रालयेन सर्वश्रेष्ठराज्यं, सर्वश्रेष्ठ-जनपदं, सर्वश्रेष्ठग्राम-पञ्चायत्, सर्वश्रेष्ठ-नगरीय-स्थानीय-संस्था, सर्वश्रेष्ठ जल-उपयोक्तृ-संघ:, सर्वश्रेष्ठ-नागरिक-समाजं च समेत्य नव-श्रेणिषु अष्टात्रिंशत् विजेतारः घोषिताः सन्ति। सर्वोत्तम-राज्यस्य-वर्गे ओडिशा-राज्यं प्रथम पुरस्कारम्, उत्तरप्रदेश-राज्यं द्वितीय-स्थानं, गुजरात-पुद्दुचेरी-राज्ये संयुक्तरूपेण तृतीस्थानं च प्राप्तवन्त:। प्रत्येकं पुरस्कारविजेत्रे प्रशंसापत्रं, परितोषिकं तथा च कतिपयेषु वर्गेषु धनपुरस्कारान् प्राप्तवन्त:। अस्मिन् अवसरे राष्ट्रपति मुर्मु: अवदत् यत् जलजीवन-अभियानस्य अन्तर्गतं देशे अष्टसप्तति: प्रतिशताधिक ग्रामीणगृहेभ्य: नलकूपजलसंयोजनस्य व्यवस्था अभवत्। इत: पूर्वं केवलं सप्तदश प्रतिशत-ग्रामीण गृहेषु एव सुरक्षितजलस्य उपलब्धि: आसीत्।

<u>विराम:</u>

संस्कृतवार्तायाः संस्करणमिदम् इदानीम् आकाशवाणीतः प्रसार्यते। सममेव अयं कार्यक्रम: आकाशवाण्याः अन्तर्जालपटले <u>www.newsonair.gov</u>.in इत्यत्र, अथ newsonair चलदूरभाषीय-तन्त्रांशे अपि उपलब्धो भविष्यति।

## फिलिस्तिन सहायतत

भारतदेशेन नवदिल्लीत: युद्धग्रस्ताय फिलिस्तिनदेशाय त्रिंशत् टन-परिमितस्य मानवीय-सहायता-सामग्री इत्यस्य प्रथम पुटकं सम्प्रेषितम्।

## आर.बी.आई: /प्रशासक:

भारतीय-रिजर्व-बैंक इत्यस्य प्रशासकेन शक्तिकान्त-दासेन उक्तं यत् भारतस्य विकासकथा नैरन्तर्येण वरीवर्धमानाऽस्ति, यतो हि अस्या: मूलचालकौ उपभोक्ता निवेशापेक्षा च गतिमन्तौ स्त:। आर.बी.आई. इत्यस्य मासिक-सन्देशे श्रीदासेन उक्तम् यत् भारते विंशति-चतुर्विंशति-पञ्चविंशति इति वित्तवर्षाय सकल-गृहगतोत्पादने सप्त-दशमलव-द्वि-प्रतिशतात्मक-अंकस्य वृद्धि: अग्रेऽपि स्थास्यतीति सम्भावना वर्तते।

## अमित शाह

केन्द्रीय गृहसहकारितामन्त्री अमित-शाह: अद्य अवदत् यत् भारतदेश: द्वितीयश्वेतक्रांतिं कर्तुं सज्ज: अस्ति। यस्य उद्देश्यं देशस्य सर्वेषां अष्ट कोटि दुग्धोत्पादकानां भविष्यित्काले सहकारी-मूलसंरचनया सह संयोजनमस्ति। अद्य आनन्दनगरे राष्ट्रिय दुग्धविकासमण्डलस्य हीरक-जयन्ती-समारोहं सम्बोधयन् श्रीशाह: अवदत् यत् वर्तमान-काले दुग्ध-उत्पादक-कृषकेषु केवलं एक-दशमलव-पञ्च-कोटि एव कृषका: सहकारीभि: सह सम्बद्धा: सन्ति, तेषु बहुसंख्यका: अद्यापि शोषणेन पीडिता: सन्तीति।

## ओडिशा/चक्रवाती

बङ्गोपसागरीय-क्षेत्रे समागत: सागरीय-झञ्झावात: दाना इत्याख्य: उग्रतां भजते। अस्मिन् गुरुशुक्रवासरयो: रात्रौ ओडिशातटं प्रति प्रापणाय झञ्झावातोऽयं अग्रसर: अस्ति। भारतीय-ऋतु-विज्ञान-विभागेन अस्य सद्य: आगम्यमानस्य संकटस्य मार्गसूचना संदत्ताऽस्ति। तदनुसारं बालासोर अथ भद्रक उतो वा केन्द्रपाडा तटै: सह अस्य सम्पर्कस्य संभावना अस्ति।

## भारतचीन-सेनाप्रमुख:

सेनाप्रमुख: जनरल-उपेन्द्र-द्विवेदी इत्यनेन विषयेऽस्मिन् सबलं प्रतिपादिनं यत् भारत-चीनयोर्मध्ये विश्वास्य प्रतिस्थानम् उभयो: देशयो: मध्ये सकारात्मक-सुदृढ-सम्बन्धेभ्य: आवश्यकमस्तीति। जनरलद्विवेदिना अद्य नवदिल्ल्यां एकस्मिन् कार्यक्रमे उक्तं यत् पूर्वीलद्दाखक्षेत्रस्य वास्तविकनियन्त्रण-रेखायां पुनश्चक्रीय-निरीक्षणव्यवस्थाया: सम्बन्धे भारतचीनयोर्मध्ये सद्य: एव जातायां सन्धौ टिप्पणीं कुर्वता प्रोक्तं यत् अस्य प्राथमिकोद्देश्य: अस्ति यत् विंशत्यधिक: द्विसहस्रतमवर्षस्य स्थितिं प्रति सेनयो: प्रत्यावर्तनमिति। तेनोक्तं यत् उभावपि पक्षौ विघटनानन्तरं चरणवद्धरीत्या अग्रेगमनाय पारस्परिकतया आश्वस्तौ सहमतौ च भवेतामिति आवश्यकमस्ति। ध्यातव्यमस्ति यत्

भारत-चीनदेशौ पूर्वीय-लद्दाख-क्षेत्रे वास्तविक-नियन्त्रण-रेखायां रक्षा व्यवस्थाम् आधृत्य सहमतौ जातौ। नवदिल्ल्यां वार्ताहरान् सम्बोधयन् विदेशसचिवः विक्रम-मिस्रीइत्येषः सूचितवान् यत् अनया सहमत्या द्वाविंशत्यधिक हिसहस्रतमवर्षे जातां चिन्तां न्यूनीकर्तुं तस्याःच समाधानम् अन्वेष्टुं साहाय्यं मेलिष्यति।

असौ अग्रे अवोचत् यत् उभयो: पक्षयो: मध्ये विस्तारपराया: चर्चाया: अनन्तरं प्रहरीव्यवस्थायां सहमति: जाता।

## झारखण्ड/अधिसूचना

झारखण्डे द्वितीचरणस्य विधानसभानिर्वाचनस्य अधिसूचना अद्य प्रकाशिता अस्ति। अस्माकं वार्ताहर: अवदत् यत् अस्मिन् चरणे नवम्बरमासस्य विंशति दिनांके आहत्य अष्टात्रिंशत् आसनानां कृते मतदानं भविष्यति। नामाङ्कनपत्राणां पूरणस्य अन्तिमातिथि: अक्टोबरमासस्य एकोनत्रिंशत दिनांक: अस्ति।

।।इति वार्ता:।।